# Vishvavasuproktam Shivarchanamahimanuvarnanam

# વિશ્વાવસુપ્રોક્તં શિવાર્ચનમહિમાનુવર્ણનમ્

## Document Information

Text title : Vishvavasuproktam Shivarchanamahimanuvarnam

File name : vishvAvasuproktaMshivArchanamahimAnuvarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shivarahasyam | harAkhyaH tRitIyAMshaH | uttarArdham | adhyAyaH 36 | 85-154 ||

Latest update : January 30, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# વિશ્વાવસુપ્રોક્તં શિવાર્ચનમહિમાનુવર્ણનમ્

- વિશ્વાવસુપુત્રસંવદે -
વિશ્વાવસુઃ -
શિવં સર્વોત્તમં મત્વા ભજધ્વમતિયત્નતઃ ।
અન્યથા મદનાવસ્થા ભવિષ્યતિ ન સંશયઃ ॥ ૮૫॥

શઙ્કરે સર્વદા પ્રીતિર્વિધેયા સ દયાર્ણવઃ ।
અપર્ણારમણઃ પ્રીતિઃ પ્રણતો મુક્તિદાયકઃ ॥ ૮૬॥

પ્રીતશ્ચેત્ સ દદાતિ શૈલતનયાકાન્તઃ પ્રભુત્વં પરં
લોકાનામવિનશ્વરં સતતમપ્યન્તે તુ મુક્તિં પરામ્ ।
તં તાવન્નિગમાન્તવાક્યવિનુતં સન્તઃ કૃતાર્થાઃ
પરં સંસારાદ્વિરતાઃ પ્રયાન્તિ શરણં દેવાગ્રગણ્યં મુહુઃ ॥ ૮૭॥

યાવત્પૂજા સાવધાનં ક્રિયતે ગિરિજાપતેઃ ।
તાવન્ન હાનિવાર્તાપિ હાનિર્દુરતરા યતઃ ॥ ૮૮॥

શઙ્કરારાધનોદ્યુક્તે સિદ્ધયસ્તુ પદે પદે ।
તતો ન દુઃખવાર્તાપિ ભો પુત્રાઃ શમ્ભુપૂજકાઃ ॥ ૮૯॥

શિવપૂજાસાધનાનિ કુસુમાનિ વને વને ।
અતિરમ્યાણિ તિષ્ઠન્તિ પૂજયધ્વં સદાશિવમ્ ॥ ૯૦॥

અરુણોદયવેલાયાં કુરુધ્વં શિવચિન્તનમ્ ।
ધ્યેયઃ સામ્બો મહાદેવઃ સર્વમઙ્ગલવિગ્રહઃ ॥ ૯૧॥

તતઃ સ્નાત્વા ભસ્મનાપિ સમ્યગુદ્ધૂલ્ય સાદરમ્ ।
ત્રિપુણ્ડ્રધારણં કાર્યં કાર્યં રુદ્રાક્ષધારણમ્ ॥ ૯૨॥

તતઃ પરં શઙ્કરમન્દિરેષુ સમ્યક્ શિવારાધનસાધનાનિ ।
સમ્પાદ્ય પૂજાપિ વિધે વિધેયા કાર્યા પ્રયત્નેન ચ શાઙ્ગલિઙ્ગે ॥ ૯૩॥
(સમ્પાદ્ય પૂજા વિવિધૈર્વિધાનૈઃ કાર્યા પ્રયત્નેન ચ શાઙ્ગલિઙ્ગે)॥ ૯૩॥

શિવલિઙ્ગાર્ચનં કાલે કાલે કાર્યં નિરન્તરમ્ ।
તેનૈવ પાપનાશઃ સ્યાત્ સુખં મુક્તિશ્ચ જાયતે ॥ ૯૪॥

યદ્યપ્યત્યન્તસુલભં શામ્ભવાનાં શિવાર્ચનમ્ ।
તથાપિ દુર્લભં મન્યે પ્રમાદે સતિ સર્વથા ॥ ૯૫॥

અપ્રમાદેન કર્તવ્યં શ્રીમહાદેવપૂજનમ્ ।
સ્વપ્નેઽપ્યન્યસુરાર્ચાયાં આદરસ્ત્યાજ્ય એવ હિ ॥ ૯૬॥

ત્યાજ્યં સર્વાત્મના ત્યાજ્યં શિવાન્યસુરપૂજનમ્ ।
સ્વપ્નેઽપિ શિવપૂજૈવ કર્તવ્યાતિપ્રયત્નતઃ ॥ ૭૭॥

અશિવાનિ ભવિષ્યન્તિ શિવાન્યસુરપૂજનાત્ ।
અતસ્તન્નૈવ કર્તવ્યં ન કર્તવ્યં કદાચન ॥ ૯૮॥

વાઞ્છિતં શિવમસ્માકં અતઃ કાર્યં શિવાર્ચનમ્ ।
યતઃ સ્વયં શિવઃ ક્ષીરં કામધેનુઃ શિવાર્ચનમ્ ॥ ૯૯॥

શિવાર્ચનસ્ય મહિમા ન જ્ઞાતો બ્રહ્મણાપ્યતઃ ।
તજ્જ્ઞાનવિરહેઽપ્યાશુ કર્તવ્યં શિવપૂજનમ્ ॥ ૧૦૦॥

કાલાન્તરે મયા કાર્યં શિવપૂજનમિત્યપિ ।
આલસ્યં નૈવ કર્તવ્યં કાલો હિ કઠિનો યતઃ ॥ ૧૦૧॥

ક્વ તાવદાયુરસ્માકમિત્યેવાદ્ભુતચિન્તયા ।
કર્તવ્યમિતિ યત્નેન સત્વરં શિવપૂજનમ્ ॥ ૧૦૨॥

વિષમપ્યમૃતં ભૂયાદાલસ્યેન તતઃ સુતાઃ ।
કર્તવ્યમતિયત્નેન લિઙ્ગે શઙ્ગાર્ચનં મુદા ॥ ૧૦૩॥

શાઙ્ગલિઙ્ગાર્ચનં લોકે સર્વદા દુર્લભં સુતાઃ ।
વિઘ્નાનપિ નિરાકૃત્ય કુર્વન્તુ શિવપૂજનમ્ ॥ ૧૦૪॥

શિવાર્ચનસ્ય સમયે યદિ વિઘ્નો ભવિષ્યતિ ।
તદા તન્નાશ્યયત્નેન કર્તવ્યં શિવપૂજનમ્ ॥ ૧૦૫॥

શિવાર્ચનં ખલુ શ્રેયઃ શ્રેયસાં વિઘ્નસમ્ભવઃ ।
સમ્ભાવિતસ્તતસ્તસ્ય નાશોઽપિ શિવપૂજયા ॥ ૧૦૬॥

શિવાર્ચનં પરં તાવત્ સર્વારિષ્ટવિનાશનમ્ ।

સર્વેષ્ટદાયકં ચેતિ કર્તવ્યં શિવપૂજનમ્ ॥ ૧૦૭॥

શિવાર્ચનાત્ પરં લોકે કિંવા પુણ્યં ભવિષ્યતિ ।
તત્ પુણ્યોત્તમમિત્યેવ જ્ઞાતવ્યં સર્વથા બુધૈઃ ॥ ૧૦૮॥

યેન કેનાપિ વા ભક્ત્યા કૃતં યદિ શિવાર્ચનમ્ ।
તદા દદાતિ ગૌરીશસ્તસ્મૈ મુક્તિમસંશયમ્ ॥ ૧૦૯॥

અપારસુકૃતામ્બુધિર્યદિ ભવેત્ પ્રવૃદ્ધસ્તદા
શિવાર્ચનરતિભવેદિતિ મતિઃ પ્રવૃદ્ધા તતઃ ।
અવશ્યમસકૃત્સ્મૃતઃ પ્રણત એવ વા પૂજિતો
દદાતિ પરમં પદં ગિરિશ ઇત્યવૈમિ ધ્રુવમ્ ॥ ૧૧૦॥

વિનાશયતિ પાતકામિતમહાગિરીનેકદા
સ્મૃતોઽપિ ગિરિશઃ સુતાઃ સકૃદપારપુણ્યપ્રદઃ ।
સ એવ સુરપુઙ્ગવૈર્મનસિ સર્વદા પૂજ્યતે
સ એવ મુનિપુઙ્ગવૈરપિ સમાધિનિષ્ઠૈરપિ ॥ ૧૧૧॥

અપૂર્વમીશાર્ચનમેકમેવ લોકે પ્રસિદ્ધં સકલાર્થહેતુઃ ।
તત્તુલ્યમન્યન્ન મયાપિ દૃષ્ટં વેદૈર્ન દૃષ્ટં સુરપુઙ્ગવૈર્વા ॥ ૧૧૨॥

ન યાગદાનાધ્યયનાદિભિર્વા લિઙ્ગાર્ચનાત્યાદરપુણ્યતુલ્યમ્ ।
પુણ્યં ભવિષ્યત્યત એવ તાવત્ તત્પુણ્યપુણ્યં વિદુરાસ્તિકાસ્તે ॥ ૧૧૩॥

આચારમન્યદ્વક્ષ્યામિ (રહસ્યમન્યદ્વક્ષ્યામિ)શૃણુધ્વમતિસાદરમ્ ।
શ્રુતે તસ્મિન્ શિવાચારે ભક્તિવૃદ્ધિર્ભવિષ્યતિ ॥ ૧૧૪॥

યા શિવાર્ચનસામગ્રી સર્વા સા ભૂતિપાવના ।
કર્તવ્યા મૂલમન્ત્રેણ તયા તુષ્ટો ભવેત્ શિવઃ ॥ ૧૧૫॥

અત્રૈવોદાહરન્તીમમિતિહાસં પુરાતનમ્ ।
વિજયાનગરે કશ્ચિત્ સ્થિતઃ શામ્ભવપુઙ્ગવઃ ॥ ૧૧૬॥

સ સમારાધયન્નેવ ભાવલિઙ્ગં શિવાત્મકમ્ ।
ભસ્મોદ્ધૂલિતસર્વાઙ્ગો દદર્શ સ્વપ્નમેકદા ॥ ૧૧૭॥

તૈન તીર્થેશ્વરો દૃષ્ટઃ સ્વપ્ને સર્વસુરેશ્વરઃ ।
દૃષ્ટાશ્ચ શામ્ભવાસ્તત્ર શિવધ્યાનપરાયણાઃ ॥ ૧૧૮॥

ભસ્મોદ્ધૂલિતરુદ્રાક્ષત્રિપુણ્ડ્રાઙ્કિતમસ્તકાઃ ।

શિવલિઙ્ગાર્ચનેનૈવ સન્તુષ્ટાઃ સતતં મુદા ॥ ૧૧૯॥

તલ્લિઙ્ગપૂજનં દૃષ્ટા વિમલૈર્બિલ્વપલ્લવૈઃ ।
નીલોત્પલૈઃ પુણ્ડરીકૈઃ કુન્દૈશ્ચ કુમુદૈરપિ ॥ ૧૨૦॥

રત્નાભરણસંયુક્તં દુકૂલપરિવેષ્ટિતમ્ ।
દિવ્યોપહારસંહારફલરાજિવિરાજિતમ્ ॥ ૧૨૧॥

ધૂપધૂમસમાક્રાન્તં પુષ્પગન્ધવિરાજિતમ્ ।
કર્પૂરદીપમાલાભિઃ પરિતઃ પરિવેષ્ટિતમ્ ॥ ૧૨૨॥

વેદૈર્મૂર્તિધરૈરેવ સ્તુતં સર્વાર્થસિદ્ધિદમ્ ।
સર્વમઙ્ગલદં નિત્યં સ્મરણેનાપિ તત્પરમ્ ॥ ૧૨૩॥

ગીતનાટ્યસમારમ્ભતત્તદ્ધ્વનિવિરાજિતમ્ ।
દેવદુન્દુભિનિર્ઘોષપ્રતિધ્વનિવિજૃમ્ભિતમ્ ॥ ૧૨૪॥

દેવગન્ધર્વનારીણાં સમૂહૈશ્ચ વિરાજિતમ્ ।
ગૌરીપૂજનસંસક્તસુરનારી સમન્વિતમ્ ॥ ૧૨૫॥

તાદૃશં મન્દિરં દૃષ્ટ્વા તીર્થેશસ્ય સ શામ્ભવઃ ।
પૂજાં તીર્થેશલિઙ્ગસ્ય ચકારાતીવ ભક્તિતઃ ॥ ૧૨૬॥

પઞ્ચામૃતાભિષેકાદ્યૈઃ ચન્દનૈશ્ચ મનોહરૈઃ ।
દુકૂલૈઃ કુસુમૈર્દિવ્યૈઃ મન્દારાદ્યૈર્વિશેષતઃ ॥ ૧૨૭॥

ધૂપદીપાદિભિર્દિવ્યૈઃ નૈવેદ્યૈરપિ સાદરમ્ ।
નીરાજનૈશ્ચ વિવિધૈઃ દિવ્યકર્પૂરસમ્ભવૈઃ ॥ ૧૨૮॥

પ્રદક્ષિણનમસ્કારાન્ કૃત્વા ભક્તિપુરઃસરમ્ ।
ઉપવિષ્ટઃ શિવં પશ્યન્ જપન્ પઞ્ચાક્ષરં મનુમ્ ॥ ૧૨૯॥

તાવન્નિયમમાસાદ્ય તૃષિતેન જલાન્યપિ ।
ન પીતાન્યેવ તેનાતઃ પિપાસા વૃદ્ધિમાપ સા ॥ ૧૩૦॥

તતઃ પરં સમાનીતં પાનીયમતિશોભનમ્ ।
કૃત્વા શિવાર્પણં પાતું સ ચકાર મતિં તતઃ ॥ ૧૩૧॥

તદાનીમાગતઃ કોઽપિ તસ્મિન્ ગિરિશમન્દિરે ।
ભૂતિરુદ્રાક્ષવીતાઙ્ગઃ શિવનામજપોત્સુકઃ ॥ ૧૩૨॥

સમાગત્ય સ તં પ્રાહ શામ્ભવાગ્રે પરં પ્રિયમ્ ।
મામા પિબ જલં વિપ્ર તદીશાનર્પિતં યતઃ ॥ ૧૩૩॥

શિવભક્તોઽસિ ધન્યોઽસિ તદીશાનાર્પિતં જલમ્ ।
પાતુમિચ્છસિ કિં તત્તુ ગિરિશાય સમર્પય ॥ ૧૩૪॥

તજ્જલં ભૂતિસંયુક્તં કુરુ ભસ્મવિવર્જિતમ્ ।
ન ગૃહ્ણાતિ જલં શમ્ભુર્ગાઙ્ગં વા કિમુતેતરત્ ॥ ૧૩૫॥

યઞ્જલં ભૂતિસંયુક્તં ન ભવિષ્યતિ તજ્જલમ્ ।
અદેયં શઙ્કરાયેતિ ન જ્ઞાતં કિં ત્વયા પરમ્ ॥ ૧૩૬॥

યદ્યદ્દેયં મહેશાય તદ્ભસ્મરહિતં યદિ ।
ન ગૃહ્ણાતિ મહાદેવસ્તતો મા પિબ તઞ્જલમ્ ॥ ૧૩૭॥

તતઃ પરં વિભૂતિર્વા ક્વાસ્તીત્યુક્તઃ સ શાઙ્કરઃ ।
પ્રાહ ભૂતિં ગૃહાણેતિ શામ્ભવાય મહાત્મને ॥ ૧૩૮॥

તતો ગૃહીત્વા તાં ભૂતિં ભૂતિદામતિભક્તિતઃ ।
પ્રક્ષિપ્ય જલમધ્યે તુ મૂલમન્ત્રેણ સાદરમ્ ॥ ૧૩૯॥

તતસ્તેનૈવ મન્ત્રેણ તત્કૃત્વા શઙ્કરાર્પણમ્ ।
પપૌ શિવં સ્મરન્નેવ કૃતાર્થોઽસ્મીતિ સાદરમ્ ॥ ૧૪૦॥

તત્ર સ્થિત્વા કિયત્કાલં શિવધર્માન્ વિશેષતઃ ।
સ તસ્માદેવ શુશ્રાવ સર્વપાપવિનાશકાન્ ॥ ૧૪૧॥

ધર્મોપદેશકે તસ્મિન્ તસ્યાભૂદ્ગિરિશત્વધીઃ ।
તેન ધર્મેષુ વિશ્વાસઃ તદુક્તેષ્વભવત તદા ॥ ૧૪૨॥

તતઃ પરં સમુત્થાય તં પ્રણમ્યાતિભક્તિતઃ ।
તમેવ ગુરુરિત્યુક્ત્વા ત્યક્તનિદ્રોઽભવત્ તતઃ ॥ ૧૪૩॥

તસ્માત્ કુમારાઃ સર્વાણિ પુષ્પાદીનિ વિશેષતઃ ।
ભૂતિયુક્તાનિ દેયાનિ મૂલમન્ત્રેણ શમ્ભવે ॥ ૧૪૪॥

અપૂતમપિ પૂતં સ્યાત્ ભસ્મના સંયુતં યદિ ।
તસ્માદ્ભસ્મયુતં દેયં લિઙ્ગે બિલ્વાદિકં સુતાઃ ॥ ૧૪૫॥

યદિ સ્યાદ્ભસ્મરહિતં પીયૂષમપિ તત્પરમ્ ।
વિષમિત્યેવ મન્તવ્યં યતો નેશાર્પણં હિ તત્ ॥ ૧૪૬॥

હારેષ્વપિ દુકૂલેષુ સુવર્ણાભરણેષ્વપિ ।
ભૂતિર્દેયા પ્રયત્નેન મહેશવિનિવેદને ॥ ૧૪૭॥

શિવનૈવેદ્યપાકાર્થં પ્રવૃત્તૈર્ભૂતિસંયુતૈઃ ।
પાકાગાર પ્રવેશોઽપિ કર્તવ્યો યત્નપૂર્વકમ્ ॥ ૧૪૮॥

તેન કીટાદિસમ્બન્ધદોષોઽપિ સ વિનશ્યતિ ।
ભૂતિર્નૈવેદ્યપાત્રેઽપિ પ્રદેયા જલસંયુતા ॥ ૧૪૯॥

ભૂતિરુદ્રાક્ષપૂતાઙ્ગૈર્નૈવેદ્યમપિ યત્ કૃતમ્ ।
તદ્ગૃહ્ણાતિ મહાદેવઃ તદેવ હિ સુધામયમ્ ॥ ૧૫૦॥

કિં તયા સુધયા પુત્રાઃ કિઞ્ચિદ્ભસ્માન્વિતં યદિ ।
જલમપ્યર્પિતં ભક્ત્યા તદીશાય સુધાં વિદુઃ ॥

પૂજનં ચ મહેશસ્ય ભૂતિરુદ્રાક્ષભૂષિતઃ ।
કર્તવ્યમતિયત્નેન મૂલમન્ત્રેણ ભક્તિતઃ ॥ ૧૫૨॥

યઃ પઞ્ચાક્ષરમુચ્ચરન્ અતિસિતાં ભૂતિં વહન્ મસ્તકે
ભાલે વક્ષસિ બાહુદણ્ડયુગલે રુદ્રાક્ષમાલામપિ ।
શર્વારાધનતત્પરો જલલવૈર્બિલ્વૈશ્ચ દૂર્વાઙ્કુરૈઃ
પુષ્પૈર્વા સ શિવં પ્રયાતિ સ પરં ધન્યોત્તમો વસ્તુતઃ ॥ ૧૫૩॥

ત્યજ ત્યજ તટિન્નટીવિવિધધૂટિકાચેટિકા
વિકારકરમિન્દિરારુચિરભૂવિહારં પરમ્ ।
ભજાશુ ભજ ધૂર્જટિં પટુકૃપીટયોનિસ્ફુર-
લ્લલાટપટલોલ્લસત્સમભિભૂતભાનુપ્રભમ્ ॥ ૧૫૪॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે વિશ્વાવસુપ્રોક્તં શિવાર્ચનમહિમાનુવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । ઉત્તરાર્ધમ્ । અધ્યાયઃ ૩૬। ૮૫-૧૫૪ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . uttarArdham . adhyAyaH 36. 85-154 ..

Proofread by Ruma Dewan

*Vishvavasuproktam Shivarchanamahimanuvarnanam*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*